# શ્રીલઘુશાન્તિસ્તવઃ

Shri Laghushantistavah

sanskritdocuments.org

March 31, 2019

# Shri Laghushantistavah

# શ્રીલઘુશાન્તિસ્તવઃ

## Sanskrit Document Information

Text title : laghushAntistavaH

File name : laghushAntistavaH.itx

Category : deities_misc, jaina

Location : doc_deities_misc

Author : Shriman Devasuri

Proofread by : DPD

Latest update : March 31, 2019

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

March 31, 2019

*sanskritdocuments.org*

Shri Laghushantistavah

# શ્રીલઘુશાન્તિસ્તવઃ

શ્રીમાનદેવસૂરિસૃત્રિતઃ
શાન્તિં શન્તિનિશાન્તં શાતનં શાન્તાશીવં નમસ્કૃત્ય ।
સ્તોતઃ શાન્તિનિમિત્તં મન્ત્રપદૈઃ શાન્તયે સ્તૌમિ ॥ ૧॥

ઓમિતિનિશ્ચિતવચસે નમો નમો ભગવતેऽર્હતે પૂજામ્ ।
શાન્તિજિનાયજયવતે યશસ્વિને સ્વામિને દમિનામ્ ॥ ૨॥

સકલાતિશેષકમહા સમ્પત્તિસમન્વિતાય શસ્યાય ।
ત્રૈલોક્યપૂજિતાય ચ નમો નમઃ શાન્તિદેવાય ॥ ૩॥

સર્વામરસુસમૂહસ્વામિકસમ્પૂજિતાય ન જિતાય ।
ભુવનજનપાલનોદ્યનનમાય મનનં નમમ્નમ્મૈ ॥ ૪॥

સર્વદુરિતૌઘનાશનકરાય સર્વાશિવપ્રશમનાય ।
દુષ્ટગ્રહભૂતપિશાચશાકિનીનાં પ્રમથનાય ॥ ૫॥ યુગ્મમ્ ॥

યસ્યેતિનામમન્ત્રપ્રધાનવાક્યોપયોગકૃતતોષા ।
વિજયા કુરુતે જનહિનમિતિ ચ નુતા ! નમત તં શાન્તિમ્ ॥ ૬॥

ભવતુ નમસ્તે ભગવતિ ! વિજયે ! સુજયે ! પરાપરૈરજિતે ! ।
અપરાજિતે ! જગત્યાં જયતીતિ જયાવહે ! ભવતિ ! ॥ ૭॥

સર્વસ્યાપિ ચ સઙ્ઘસ્ય ભદ્રકલ્યાણમઙ્ગલપ્રદદે ! ।
સાધૂનાં ચ સદા શિવસુતુષ્ટિપુષ્ટિપ્રદે ! જીયાઃ ॥ ૮॥

ભવ્યાનાં કૃતસિદ્ધે ! નિર્વૃતિનિર્વાણજનનિ ! સત્ત્વાનામ્ ।
અભયપદાનનિરતે ! નમોऽસ્તુ સ્વસ્તિપ્રદે ! તુભ્યમ્ ॥ ૯॥

ભક્તાનાં જન્તૂનાં શુભાવહે ! નિત્યમુદ્યતે ! દેવિ ! ।
સમ્યગ્ દૃષ્ટીનાં ધૃતિરતિમતિબુદ્ધિપ્રદાનાય ॥ ૧૦॥

જિનશાસનનિરતાનાં શાન્તિનતાનાં ચ જગતિ જનતાનામ્ ।

શ્રીસમ્પત્કીર્તિયશો વર્ધનિ ! જયદેવિ ! વિજયસ્વ ॥ ૧૧॥ યુગ્મમ્ ।

સલિલાનલવિષવિષયધરદુષ્ટગ્રહરાજરોગરણભયતઃ ।
રાક્ષસરિપુગણમારીચૌરેતિશ્વાપદાદિભ્યઃ ॥ ૧૨॥

અથ રક્ષ રક્ષ સુશિવં કુરુ કુરુ શાન્તિં ચ કુરુ કુરુ સદેતિ ।
તુષ્ટિં કુરુ કુરુ પુષ્ટિં કુરુ કુરુ સ્વસ્તિં ચ કુરુ કુરુ ત્વમ્ ॥ ૧૩॥ યુગ્મમ્ ॥

ભગવતિ ! ગુણવતિ ! શિવશાન્તિતુષ્ટિપુષ્ટિસ્વસ્તીહ કુરુ કુરુ જનાનામ્ ।
ઓમિતિ નમો નમો હ્રાઁ હ્રીં હ્રૂઁ યઃ ક્ષઃ હ્રીં ફટ્ ફટ્ સ્વાહા ॥ ૧૪॥

એવં યન્નામાક્ષરપુરસ્સરં સંસ્તુતા જયા દેવી ।
કુરુતે શાન્તિં નમતાં નમો નમઃ શાન્તયે તસ્મૈ ॥ ૧૫॥

ઇતિ પૂર્વસૂરિદર્શિતમન્ત્રપદવિદર્ભિતઃ સ્તવઃ શાન્તેઃ ।
સલિલાદિભયવિનાશી શાન્ત્યાદિકરશ્ચ ભક્તિમતામ્ ॥ ૧૬॥

યશ્ચૈનં પઠતિ સદા શૃણોતિ ભાવયતિ વા યથાયોગમ્ ।
સ હિ શાન્તિપદં યાયાત્સૂરિઃ શ્રીમાનદેવશ્ચ ॥ ૧૭॥ યુગ્મમ્ ॥

ઇતિ શ્રીમાનદેવસૂરિસૃત્રિતઃ શ્રીલઘુશાન્તિસ્તવઃ સમાપ્તઃ ।

Proofread by DPD

*Shri Laghushantistavah*

pdf was typeset on March 31, 2019

Please send corrections to *sanskrit@cheerful.com*